तूल्यम्, तूल्यम्, तुतूलिष्यम्, तोतूल्यम्;
ईषत्तूलः-दुस्तूलः-सुतूलः; — —
तूल्यमानः, तूल्यमानः, तुतूलिष्यमाणः, तोतूल्यमानः;
[A]तूलः, तूलः, तुतूलिषः, तोतूलः;
तूलितुम्, तूलयितुम्, तुतूलिषितुम्, तोतूलितुम्;
तूला, [1]तूलिका[B], तूलना, तुतूलिषा, तोतूला;
तूलनम्, तूलनम्, तुतूलिषणम्, तोतूलनम्;
तूलित्वा, तूलयित्वा, तुतूलिषित्वा, तोतूलित्वा;
प्रतूल्य, प्रतूल्य, प्रतुतूलिष्य, प्रतोतूल्य;
तूलम् २, } तूलम् २, } तुतूलिषम् २, } तोतूलम् २; }
तूलित्वा २, } तूलयित्वा २, } तुतूलिषित्वा २, } तोतूलित्वा २. }

## (764) " तूष तुष्टौ " (I-भ्वादिः-674. अक. सेट्. पर.)

तूषकः-षिका, तूषकः-षिका, तुतूषिषकः-षिका, तोतूषकः-षिका;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचूषतिवत् (553) ज्ञेयानि।
[C]तूषः—घञ्।

## (765) " तृक्ष गतौ " (I-भ्वादिः-660. सक. सेट्. पर.)

तृक्षकः-क्षिका, तृक्षकः-क्षिका, तितृक्षिषकः-क्षिका, [2]तरीतृक्षकः-क्षिका;
तृक्षिता-त्री, तृक्षयिता-त्री, तितृक्षिषिता-त्री, तरीतृक्षिता-त्री;
तृक्षन्-न्ती, तृक्षयन्-न्ती, तितृक्षिषन्-न्ती; —
तृक्षिष्यन्-न्ती-ती, तृक्षयिष्यन्-न्ती-ती, तितृक्षिषिष्यन्-न्ती-ती; —

---

1. स्त्रियां भावादौ 'संज्ञायाम्' (3-3-109) इति ण्वुल्। 'तूलं तूलिस्तूलशय्या शलाकायां तु तूलिका।' इति क्षीरतरङ्गिण्यां कोशवाक्यमुद्धृतम्।
2. यङन्ते, 'रीगृत्वत इति वक्तव्यम्' (वा. 7-4-90) इति अभ्यासे रीगागमः। एवं यङन्ते सर्वत्र ज्ञेयम्।

A. 'सन्मार्गसङ्कूलिषु शूलदायिनं दहन्तमेनांसि च तूलपूलवत्।' धा. का. 1.68.
B. 'क्रीडातूलिकया स्वस्मिन् कृपारूषितया स्वयम्।' यादवाभ्युदये 1-9.
C. 'तूषं तनोषि कमलस्य यथैव पूषा
खेदं च मूषसि कृपारसरूषितात्मन्।' धा. का. 1. 86.